

International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(7): 993-995
www.allresearchjournal.com
Received: 19-07-2020
Accepted: 17-08-2020

साकेतबिहारी
ग्रा.-पाली, थाना+पोस्ट- नैवतपुर
जिला- पटना, बिहार, भारत

**Corresponding Author:**
साकेतबिहारी
ग्रा.-पाली, थाना+पोस्ट- नैवतपुर
जिला- पटना, बिहार, भारत

# सिद्धान्तकौमुदी, प्रौढमनोरमा, वैयाकरणभूषणकारिकेति दीक्षितकृतीनामाकलनम्

साकेतबिहारी

**प्रस्तावना:**

संस्कृतभाषाया विविधेषु व्याकरणेषु द्विविधौ क्रमौ दृश्येते- अधिकारक्रम: प्रक्रियाक्रमश्च। तत्र प्रथमस्योदाहरणं पाणिनीयं शब्दानुशासनम्, अष्टाध्यायीति नाम्ना प्रसिद्धम्। द्वितीयस्योदाहरणं सिद्धान्तकौमुदी विद्यते। य: समस्ते भारतवर्षे अतिप्रसिद्धो विद्यते।

तत्र महर्षिणा पाणिनिना अधिकारानुसानं सूत्राणां विन्यास: कृत:, शब्दलाघवानुरोधादिति। तत्र अधिकारो द्विविधो निमित्ताधिकारो विध्यधिकारश्च। अङ्गस्य ङ्यापप्रातिपदिकात्, स्त्रियोम् धातो:, इत्येवमादयो निमित्ताधिकारा:, गुण, वृद्धि, षत्व, णत्व, सम्प्रसारणादयो विध्यधिकारा:। शब्दानां साधने अपेक्षितानां सर्वेषामेव सूत्राणामपेक्षाक्रमेण कार्यकालपक्षमाश्रित्य प्रकरणानुसारं विन्यास: प्रक्रियाक्रमो विद्यते। ननु अनयो: क: क्रम: श्रेयान्? नैकमत्यमत्रविदुषामिति।

तत्र के.सी. चटर्जी- एस.के. बेलवलकर-डॉ. सूर्यकान्तबाली पं.युधिष्ठिरमीमांसादिभि: विद्वद्भि: सविस्तरं विवेचितोऽयं प्रश्न: प्रदर्शितौ च गुणावगुणौ उभयो: पक्षयोरिति। तत्र पं. युधिष्ठिरमीमांसकेन आर्षस्याधिकारक्रमस्य श्रेयस्त्वं प्रत्यपादि। किन्तु लोकै: प्रक्रिया क्रम एव सरल इति बुद्ध्या सर्वत्र समादृत: परस्तात्, इत्यत्र नास्ति कश्चन वैमत्यावसर इति। तदनु पाणिनीयं व्याकरणं हि ''सिद्धे शब्दार्थ सम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे'' ''धर्मनियमाय'' प्रवृत्तम्। विषयमिदं कात्यायनवार्तिकम्, महाभाष्ये पश्पशाह्निके व्याख्यातं महर्षिणा पतञ्जलिना इति। तत्र लोका: संस्कतभाषां तदा स्वयम् अजानन्त, ते केवलं शब्दानां साधुत्वासाधुत्वविषये क्वचित् क्वचित् सन्दिहाना आसन् इति। अत एव पाणिनीयं व्याकरणं साधुत्वबोधाय प्रवृत्तम्। तदर्थं महदुपकारकञ्च आसीत्। परतो यदा लोके संस्कृतेन वाग्व्यवहार उच्छिन्नस्तदा संस्कृतभाषामधिगन्तुं लोका व्याकरणाध्ययने प्रवृत्ता इति।

अत: साधुत्वमात्रबोधकं पाणिनीयं व्याकरणं न तेषां तथोपकाराया अभूत्। यथा भाषाशिक्षणपरं प्रक्रियाक्रमानुसारि कातन्त्रादि व्याकरणमिति। तथा च डॉ. सूर्यकान्तबालीमहोदयेन साधूक्तं यत् ''प्रक्रियाक्रमस्य पाणिनीयतन्त्रेऽपि उद्भव: कातन्त्रवैयाकरणै: अवस्कन्दितस्य सङ्कटापन्नस्य पाणिनीयतन्त्रस्य प्राणरक्षकोऽभूत्।'' [1]

एवञ्च यदि पाणिनीये व्याकरणे प्रक्रियाक्रमो नोद्भविष्यत् तदैतद् व्याकरणं कातन्त्रादिभि: सरलै: व्याकरणै: अवक्रान्तं सल्लुप्तप्रायम् अभविष्यदिति। [2]

सिद्धान्तकौमुदी- तत्र सिद्धान्तकौमुद्या: प्रचाराधिभ्याद् इतिहासानभिज्ञानां बहूनां पण्डितानाम् इदानीमपि धारेणेयं यद् महावैयाकरणभट्टोजिदीक्षित एव पाणिनीयतन्त्रे प्रक्रियाक्रमस्य प्रवर्तक:। वस्तुत: ख्रीष्टीये प्रथमे शतके एव लोकव्यवहारेषु लुप्तायां संस्कृतभाषायां तज्ज्ञानाय प्रक्रियाक्रममवलम्ब्य कातन्त्रव्याकरणम् उद्भूत् लोकप्रियताञ्च अलभत। परत: अन्यान्यपि प्रक्रियानुसारीणि चान्द्र-जैनेन्द्र-मुग्धबोध-सारस्वतादि व्याकरणानि प्रणीतानि प्रचरितानि च। अस्य प्रक्रियाक्रमस्य उपयोगित्वं लोके समादरं चावलोक्य पाणिनीयतन्त्रीया

वैयाकरणा अपि अष्टाध्याय्याः क्रमं भङ्क्त्वा पाणिनीयसूत्राणि प्रक्रियाक्रमेण विन्यस्याध्यापयितुं प्रवृत्ता इति। अस्याः परम्पराया यथा ज्ञाता प्रथमा कृतिः धर्मकीर्तिप्रणीतो रूपावतारः यस्य कालः खीष्टीय द्वादशशतकमभितोऽनुमीयते। ततः परं न्यूनाधिके चतुर्दशे शतके विमलसरस्वती प्रणीताय प्रक्रियाक्रमवती रूपमाला अवातरत्। तस्या अव्यवहितोत्तरे काले रामचन्द्रो नाम पण्डितो व्याकरणाष्टकतत्त्वज्ञो रूपमालायास्त्रुटीः अपाकुर्वन् बहूनि नवीनानि सूत्राणि न्यवेशयत् प्रक्रिया- कौमुदीञ्च रचयामास।

एवञ्चावलोकनेन ज्ञायते यत् सिद्धान्तकौमुद्यामिव प्रक्रियाकौमुद्यामपि द्वौ भागौ पूर्वार्द्धोत्तरार्द्धसंज्ञौ विद्येते। तत्र पूर्वार्द्धसंज्ञा, सन्धिः, स्वादिः, स्त्रीप्रत्ययः, विभक्त्यर्थः, कारकाणि, समासः, तद्धितः एतानि प्रकरणानि समानानि उत्तरार्द्धे च तिङन्तप्रकरणं, ण्यादिप्रक्रिया, कृतप्रकरणम् एतानि समानान्येव। [3]

एवञ्च सिद्धान्तकौमुदी इव अयमपि वैयाकरणवरेण्यैः शेषकृष्णादिर्भिगहनाभिर्मनोरमा शेखरतुल्याभिर्बहुभिः टीकोपटीकाभिरूपबृंहिता महावैयाकरणभट्टोजिदीक्षितात् पूर्वं व्यापके क्षेत्रे समादृता च। अस्या एव सरजिमनुसरता महावैयाकरणभट्टोजिदीक्षितेन स्वयं सिद्धान्तकौमुदी विरचिता। यत्र कौमुदीति पदं प्रकिय्राकौमुद्या अनुसरणम् अनुहरणं वा ध्वनयति। उभयोः प्रकरणनामानि तत्क्रमविन्यसश्चोक्तमनुहरणं प्रकटीकुर्वन्ति।

तत्र साम्यमेतन्न मूलग्रन्थ एव, तट्टीकासु अपि प्रतिभासते। तथाहि मनोरमा शेषश्रीकृष्णस्य प्रकाशेन, शब्दरत्नञ्च विट्ठलस्य प्रसादेन तुलयितुं शक्येते। सत्यपि उभयोः साम्ये, केचन भेदा अपि दृश्यन्ते। तथाहि वैयाकरणरामचन्द्रेण पाणिनेः 2470 सूत्राण्येव सन्निवेशितानि, महावैयाकरणभट्टोजिदीक्षितेन तु सर्वाणि सूत्राणि सन्निवेशितानि इति।

तत्र वैदिकीप्रक्रिया सिद्धान्तकौमुद्यां विशेषः। एवं हि रूपावतार आरब्धः प्रक्रियाक्रमविन्यासः सिद्धान्तकौमुद्यां पूर्णतां गतः। अत एव व्याकरणशास्त्रे सिद्धान्तकौमुदी जात मात्रैव एकच्छत्रं राज्यम् अस्थापयत्। शब्दकल्पद्रुमाख्ये विख्याते विश्वकोशे पूर्वमुग्धबोधानुसारिणी व्युत्पत्तिः प्रदर्शिता, इदानीं नवीने संस्करणे तत्स्थाने कौमुद्यनुसारिणी सा समाविष्टा इति एकच्छत्वे प्रमाणमिति।

सम्प्रति महावैयाकरणभट्टोजिदीक्षितकृता 'सिद्धान्तकौमुदी' प्रक्रियाग्रन्थेषु सर्वोच्चं स्थानं बिभर्ति। ग्रन्थेऽस्मिन् पाणिनीयाष्टाध्याय्याः सर्वाण्यपि सूत्राणि प्रयोगसिद्धिदृट्या सुव्यवस्थितानि। एवञ्च दृश्यन्ते तथा यथा मालाकारो नैकविधपुष्पाणि यथयथं मालारूपेण ग्रथ्नाति। तत्र महावैयाकरणदीक्षितमहोदयेन ग्रन्थान्तरेषु प्रसृतानां प्रयोगाणां विचाराः प्रयोगसाधनावसरे कृताः साधु विजृम्भन्ते येषां परिशीलनेन भाषाविषयकः समस्तः सन्देहसमूहो दूरीभवति। अत एव इदानीं दृश्यते यत् पाणिनीयव्याकरणस्य सम्पूर्णमपि क्षेत्रं सिद्धान्तकौमुद्या क्रोडीकृतम्।

सिद्धान्तकौमुद्याः टीकापरम्परायां तत्त्वबोधिनीकारो बालमनोरमाकरश्च

व्याकरणशास्त्रे महावैयाकरणभट्टोजिदीक्षितात् पूर्वं विरचितेषु भाष्यवार्तिकादि सकलेषु ग्रन्थेषु बहवो मतभेदा अवलोक्यन्ते। तत्र महावैयाकरणभट्टोजिदीक्षितः तान् वैयाकरणान् आलोच्य शब्दकौस्तुभे स्वसिद्धान्तान् अस्थापयत्। व्याकरणतन्त्रे प्रविविक्षवः अपसिद्धान्तग्रस्तामाभूवन्निति विचिन्त्य स सिद्धान्तकौमुद्यामतिसंक्षेपेण सङ्केतरूपेण वा स्वसिद्धान्तान् न्यवेशयत्। ईदृशं सिद्धान्तसारवाक्यमाधुनिकैः वैयाकरणैः ''फक्किका'' इति भण्यते। एवं विधानां फक्किकानां मर्मप्रकाशनाय सिद्धान्तकौमुद्यां टीकायाः प्रयोजनं जातम्। अत एव अस्या अनेकाः टीका लिखिता प्रकाशिता अप्रकाशिता लुप्ताश्च विद्यन्ते। तासु टीकासु कियत्यः मूलग्रन्थस्यास्य गौरवमवर्धयन् यथा म.म. नागेशकृतः शब्देन्दुशेखरः स्वोपज्ञा मनोरमा इत्येवमादयः। ईदृशानां टीकानामपि बहवष्टीकाः टिप्पण्यश्च विरचिताः प्रचलितश्च विद्यन्ते। सर्वैकत्वेन अस्या व्याख्याग्रन्था भवन्ति। तत्र एतावतीषु टीकासु प्रकृतग्रन्थे द्वे एव विवेचयिष्येतेवैयाकरणज्ञानेन्द्रसरस्वतीकृता तत्त्वबोधिनी वैयाकरणवासुदेवदीक्षितकृता बालमनोरमा च। तत्र प्रथमम् उभयोः टीकाकारयोः परिचयप्रदानमुचितम्, किन्तु आश्चर्यस्य खेदस्य च विषयोऽयं यद् अद्यपि अनयोः परिचयः अत्यल्प एवोपलभ्यते।

तत्त्वबोधिनीकारस्य महावैयाकरणज्ञानेन्द्रसरस्वत्याः परिचयः

महावैयाकरणभट्टोजिदीक्षितस्य शिष्य इति परम्परया श्रुतम्, तत्र दीक्षितमतस्यैव तत्त्वबोधिन्यां सामान्यतः समर्थनदर्शनात्। तदानीमयं दलद्वयविभक्तेषु वैयाकरणेषु महावैयाकरणभट्टोजिदीक्षितस्य पक्षधर आसीदिति स्पष्टं प्रतीयते। अयं तत्त्वबोधिन्याः पुष्पिकायाम् आत्मनं श्रीवामनेन्द्रचरणस्य शिष्यम् अकथयत्। कथं तर्हि महावैयाकरणोऽयं महावैयाकरणभट्टोजिदीक्षितस्य शिष्य इति प्रवादो भवति। वस्तुतो यदि प्रवादो यथार्थः तर्हि अस्य गुरुद्वये शिष्यत्वं सिद्धयति। नो चेत् स्वलेखानुसारमस्य श्रीवामनेन्द्र एव गुरुः, न महावैयारकणभट्टोजिदीक्षितस्य प्रबलेन आग्रहेण तत्त्वबोधिनीटीकामलिखत् इति काश्यां पण्डितमण्डलीषु प्रसिद्धिः। [4]

एवञ्च ज्ञायते यत् पण्डितराजजगन्नाथस्य पिता पेरुम्भट्टः अस्माज्ज्ञानेन्द्रसरस्वतीभिक्षोर्वेदान्तम् अपठत्। एतस्मिन् प्रसङ्गे पण्डितराजजगन्नाथः स्वयमेव स्वकीये रसगङ्गाधरे स्वपितु परिचयप्रसङ्गेऽलिखत्-

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगत सकल ब्रह्मविद्या प्रपञ्चः,  
काणादीराक्षयादीरपि गहनगिरो यो महेन्द्रादवेदीत्।।1।।  
देवादेवाध्यगीष्टस्मरहरनगरे शासनं जैमिनीयं  
शेषाङ्कप्राप्तशेषामलभणितिरभूत् सर्वविद्याधरो यः।।2।।  
पाषाणादपि पीयूषं स्पन्दते यस्य लीलया।  
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम्।।3।। [5]

एवञ्चायं ज्ञानेन्द्रः शैव आसीत्द्व यतोहि अनेन तत्त्वबोधिन्या आदौ मङ्गलाचरणरूपे लिखितम्-

नत्वा विश्वेश्वरं साम्वं कृत्वा च गुरुवन्दनम्।  
सिद्धान्तकौमुदीव्याख्या क्रियते तत्त्वबोधिनी।। [6]

तदनु महावैयाकरणोऽयं संन्यासी आसीदितिनाम्नैव ज्ञायते। तथा च पण्डितराजजगन्नाथः शिष्यस्यास्य पुत्रत्वेन पौत्रोचितस्नेहभाजनम् महावैयाकरणभट्टोजिदीक्षितस्तु गुरुरिति बलवतानुबन्धेनायम् उभयत आकृष्यमाणोऽपि गुरोरेव पक्षमवलम्बतेति अनुमातुं शक्यते। तत्र

भट्टोजिदीक्षितो यद्यपि सिद्धान्तकौमुद्यामास्थितानां स्वमतानां समर्थनाय व्याख्यानाय च स्वयं प्रौढमनोरमाख्यां नाम व्याख्यामलिखत्। तथाऽपि स्वेनैव स्वमत समर्थनं स्ववैदुष्यप्रशंसनञ्च न शोभनीयमिति अवधार्य भट्टोजिदीक्षितः प्रौढमनोरमामेवाधारीकृत्य टीकान्तरं निर्मातुं स्वशिष्यं ज्ञानेन्द्रसरस्वतीम् अचूचुददिति प्रतीयते। अत एव प्रौढमनोरमा तत्त्वबोधिन्योः अत्यल्पो भेदो व्याख्यातो भवति। अत एव गुरोराग्रहवशादनेन तत्त्वबोधिनी लिखिता इति प्रवादः। अनेन प्रतीयते च यत् महावैयाकरणभट्टोजिदीक्षितस्य प्रेरणया अस्याः प्रचारो मनोरमाऽपेक्षया अधिकोऽभूदिति सङ्गच्छते। तत्र मनोरमा हि कौमुद्या सहिता सम्पूर्णा नाद्यापि प्रकाशिता, तत्त्वबोधिनी तु बहुशस्तथा प्रकाशिता। अत्रापि तदेव कारणं प्रतीयते इति।

अत एव तत्त्वबोधिनी महावैयाकरणभट्टोजिदीक्षितमतमनुगच्छति, बालमनोरमा तु म.म. नागेशमतमिति नाविदितं विदुषाम् उभे टीके अवगाहमानानामिति। अस्य समयः महावैयाकरणभट्टोजिदीक्षितस्य कालादल्पमात्रं पश्चात् 1530-1600 ख्रीष्टाब्दान्तः पाती निर्धार्यते। अयं केरल ब्राह्मण आसीदिति बहवः विद्वांसः कथयन्ति। अस्य शिष्यो नीलकण्ठवाजपेयी 1540-1620 सिद्धान्तकौमुद्याः सुखबोधिनीनाम्नीं टीकामलिखत्, तत्त्वबोधिन्याश्च गूढार्थदीपिका नाम्नीमिति। पाणिनीयदीपिका परिभाषावृत्तिरिति वृत्तिग्रन्थद्वयमपि अनेन प्रणीतमिति।

बालमनोरमाकारस्य महावैयाकरणबासुदेववाजपेयीमहोदयस्य परिचय

तत्र महावैयाकरणवासुदेववाजपेयी सिद्धान्तकौमुद्या बालमनोरमानाम्नीं टीकां व्यरचयत्। अस्य पिता पं. महादेव वाजपेयी माता अन्नपूर्णा, गुरुः विश्वेश्वर वाजपेयी, आश्रयदाता च चोलतञ्जीरदेशीयानां भोसलवंशोद्भवानां शाहजीशरभजी तुक्कोजीतिनामकानां राज्ञामात्य आनन्दराय आसन्। तत्र बालमनोरमाकारोऽयं अध्वर्युपदे नियोजित आसीत्। [7] अस्य पिता कर्मकाण्डशास्त्रस्य निष्णाता गुरुरपि श्रौतस्मार्तकर्मकाण्डग्रन्थेषु पारङ्गत आसीत्। तेनास्य याजनं मुख्या वृत्तिरित्यवगम्यते। अस्य समय उक्तानाम् भोसलनरेशानां समकालिकत्वात् 1690-1760 ख्रीष्टाब्ददेशीयो निर्धारयितुं शक्यते। अनेन एतावान् स्वपरिचयः स्वनैव बालमनोरमाटीकाया अन्ते प्रदत्तः।

तत्र बालमनोरमायाः प्रथमसम्पादकः पण्डितचन्द्रशेखरशास्त्रिमहोदयः ख्रिष्टाब्दाष्टदशशतकस्य चरमपद जातम् एवम् उररी करोति। [8] अस्य इयं बालमनोरमा सारल्येन वैशद्येन च सर्वा एवम् अन्याष्टीका अतिशेते। तेन बालानां कृते नितान्तं मनोरमेति अहोऽन्वर्थता अस्याः। यथा तत्त्वबोधिनी मनोरमामनुहरति तथा बालमनोरमा बृहच्छब्देन्दुशेखरमिति स्पष्टम्। किन्त्वत्र प्रतिपादिताः सिद्धान्ताः सर्वथा आग्रहरहिता आक्षेपरहिताश्च प्रतीयन्ते। मतमतान्तरप्रदर्शनं नास्या लक्ष्यमिति। तत्र मूलग्रन्थे सारतोऽभिहितस्यैव विषयस्य स्पष्टीकरणमस्या लक्ष्यमिति, तत्र च अस्या अनुपमं साफल्यम्। तत्र पूर्वमीमांसासूत्राणामुपरि अनेन अध्वरमीमांसाकुतूहलवृत्तिनाम्नी टीका रचिता मुहुर्मुहुः प्रकाशिता च। वैयाकरणोऽयं पूर्वाचार्याणां समीक्षणे काशिकामहाभाष्यलघुशब्देन्दुशेखरग्रन्थत्रयस्य साहाय्यं व्यदधात्। तत्र म. म. नागेशमतमनुसरता यत्र तत्र लघुशब्देन्दुशेखरे द्रष्टव्यमिति स्वकीय बालमनोरमायामभिहितम्।

एवञ्च बालमनोरमायां समागतानां मीमांसाशास्त्रीयविषयानां व्याख्याने बहुशोऽनेन ''विशेषस्तुमत्कृताध्वरमीमांसाकुतूहलवृत्तौ द्रष्टव्य'' इत्युक्तम्। तत्र ग्रन्थदर्शनेनैवास्य विविधशास्त्रपारङ्गतत्त्वं ज्ञातुं शक्यते। स्फीतेन निष्पक्षरूपेण सरलविवेचनेनास्य बालमनोरमा सर्वमनोरमा जाता। एतेनास्य व्याकरणानुशीलकानां कृते महत्त्वपूर्णं स्थानं सुरक्षितं विद्यते।

एवञ्च ज्ञायते यन्महावैयाकरणेन भट्टोजिदीक्षितेन स्वयं सिद्धान्तकौमुद्याः व्याख्या प्रणीता या 'प्रौढमनोरमा' इति नाम्ना प्रसिद्धा विद्यते। अस्या उपरि विस्तृतरूपेण चर्चा अनन्तरमहं करिष्यामि।

तदनु संवत् अशीत्यधिकषोडशशततः विंशत्यधिकसप्तदशशत (1680-1720) वैक्रमाब्दमध्यकालिकेन तात्कालिकोत्कृष्टशैवविदुषा वैयाकरण-श्रीमधुकरत्रिपाठीनस्तनूजेन श्रीरामानन्दनामाभिधेयविदुषा सिद्धान्तकौमुद्याः 'तत्त्वदीपिका' इति नाम्नी टीका प्रणीता। सा टीका सम्प्रति सम्पूर्णा न उपलब्धा केवलं हलन्तस्त्रीलिङ्गं यावदुपलभ्यते।

तत्र प्रायेण संवत् पञ्चदशाधिकसप्तदशशत (1715) वैक्रमाब्दीयेन वैयाकरणेन श्रीवेङ्कटाद्रिभट्टात्मजश्रीतिरुमलभट्टतनूजेन वैयाकरणेन श्रीरामकृष्णभट्टनामाभिधेय विदुषा सिद्धान्तकौमुद्याः 'रत्नाकर' इति नाम्नी टीका लिखिता। अस्याः हस्तलेखाः तञ्जौरस्थराजकीयपुस्तकालये, जम्मूस्थ रघुनाथमन्दिरपुस्तकालये च वर्तन्ते। जम्मूस्थरघुनाथमन्दिरपुस्तकालयस्थ हस्तलेखेषु एकस्य लेखनसमयः संवत् चतुश्चत्वारिंशदधिकसप्तदशशत (1744) वैक्रमाब्दं विद्यते।

एवञ्च पूनानगरस्थ भण्डारकप्राच्यविद्याप्रतिष्ठानसंग्रहे टीकाग्रन्थस्यास्य चत्वारो हस्तलेखा प्राप्यन्ते। [9]

## संदर्भ


1. भट्टोजिदीक्षित 'हिज कन्ट्रिब्युशन टु संस्कृत ग्रामर– डॉ. सूर्यकान्तबाली– पृ.सं.–34
2. हिष्ट्री ऑपफ संस्कृत लिट्रेचर– ए.बी. कीथ पृ.सं. 431
3. वैयाकरणसि(न्तकौमुदी भूमिकायाम् – सं.डा. गोपालदत्त पाण्डेयः– पृ.सं. 11
4. व्याकरणशास्त्रा का इतिहास– पं. युधिष्ठिरमीमांसकः पृ.सं. 152
5. रसगंगाधरः– पण्डितराजजगन्नाथः– मंगलश्लोकः सं. 2, 3– पृ.सं. 3।
6. सि(न्तकौमुदी– तत्त्वबोध्नीटीकायाः मंगलश्लोकः पृ.सं. 1 ।
7. व्याकरणशास्त्रा का इतिहास– पं. युधिष्ठिरमीमांसकः– प्रथमो भागः पृ.सं. 152।
8. व्याकरणशास्त्रा का इतिहास– पं. युधिष्ठिरमीमांसकः– प्रथमो भागः पृ.सं. 152।
9. जम्मूरघुनाथमन्दिरपुस्तकालयस्य सूचीपत्रो पृ.सं. – 50